**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 3
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# मूल्यशिक्षायां विद्यालयीयकार्यक्रमाणां योगदानम्

**सुश्री सङ्गीता मण्डल**
शोधच्छात्रा, शिक्षाशास्त्रीविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

**Article Info**
**Article History**
Received : 03 June 2024
Published : 17 June 2024
**Publication Issue :**
May-June-2024
Volume 7, Issue 3
**Page Number :** 138-140

**सारांश:-** मूल्यबोधं विना मनुष्यपदवाच्य: कोऽपि भवितुं नार्हति। तदर्थमस्माभि: प्राथमिकशिक्षादारभ्य एव प्रयत्न: कर्तव्य:। शिशु: पाठ्यपुस्तकशिक्षादतिरिच्य मानविकमूल्यबोधाधिकारी यथा स्यात्तदर्थं विद्यालयीयस्तरे विविधकार्यक्रमाणामायोजनं क्रियते। तानि कार्यक्रमाणि शिशूनां मानसिकवृद्धये कथं कार्यं सम्पादयति। तेषामुपयोगिता कथं सर्वाङ्गिणविकाशे इति अस्यां रचनायां यथामति प्रतिपादितम्।

**कूटशब्दा:** – मूल्यशिक्षा, मूल्यबोध:, विद्यालय:, कार्यक्रम:।

**भूमिका** – "शिक्षोद्देश्यं मानवस्य सर्वाङ्गीणाभिवृद्धिर्भवति, शिक्षिते मानवे च मानवीयगुणा: भवितव्या: तथा स: मानवकल्याणाय स्वयोगदानं प्रदातुमपि समर्थो भवेत्। अस्माकं शिक्षा मूल्यानामवगमनार्थं व्यवहारार्थञ्च मूल्यसङ्कटपरिस्थिना-मवरोधार्थञ्च योग्यानां व्यक्तीनां निर्माणे सर्वथा अक्षमा वर्तते। मूल्यानां शिक्षणं नास्ति सुकरं शिक्षकाणाम् अत: अध्यापकै: पूर्व मूल्यानामात्मसातीकरणङ्कृत्वा पाठनवेलायां स्वव्यवहारेण छात्राणां पुरत: प्रदर्शनङ्करणीयम्। विद्यालयस्य विभिन्नाभि: पाठ्यसहगामिक्रियाभि: सुनियोजितरूपेण मूल्यानां शिक्षाप्रदातुं शक्यते। विद्यालयस्य मूल्यप्रधानपरिवेश: मूल्यानां वपने, अङ्कुरणे तथा वृद्धौ सहायको भवति। अत्र समासत: मूल्यशिक्षायां पाठ्यसहगामिक्रियाणां किं योगदानमिति प्रस्तूयते"।

**मूल्यशिक्षा** – मूल्यशिक्षा शिक्षाया: स: भाग: अस्ति य: नैतिकमूल्यानाम्, मानदण्डानाम्, कौशलानां, स्वभावस्य च विकासे केन्द्रित: भवति ये छात्राणां समग्रविकासे सहायका: भवन्ति। मूल्यशिक्षा अस्मान् दया, सत्यम्, सहयोग:, परोपकार: इत्यादीनि तत्त्वानि शिक्षयति। मूल्यशिक्षा चरित्रविकासे, व्यक्तित्वविकासे, आध्यात्मिकविकासे च सहायकं भवति।

**विद्यालयीयकार्यक्रमाणामायोजनम् (वर्तमानपरिप्रेक्ष्ये)** – शिक्षका: विद्यालयेषु विभिन्नाभि: पाठ्यसहगामिक्रियाभि: विद्यर्थिषु मूल्यविषयकमान्यताभ्य: व्यावहारिकरूपं प्रदातुं क्षमा: भवेयु:। दुर्भाग्यवशात् विद्यालया: सकार्यकलापान् औपचारिकरूपेणैवाचारन्ति, न तु आत्मिकरूपेण। शिक्षाया: प्रमुखोद्देश्य बालकस्य सर्वाङ्गीणविकासत्वेन सिध्यति। विद्यालये च विभित्राभि पाठ्यसहगामिक्रियाभि: छात्रेषु मूल्योत्रयनारथं प्रयत्नो करणीय:। क्रीडाद्वारा सामूहिकभावनाया: सामाजिकतायाश्च विकास: भवति, परं क्रीडाङ्गणे क्रीडापेक्षया परस्परं कोलाहलोऽधिक: भवति। क्रीडाक्षेत्रं सङ्घर्षक्षेत्रत्वेन परिदृश्यते। तस्मात् क्रीडाद्वारा मूल्यविकसनं न सम्भवति।

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

विद्यालयेषु आवर्षं भूयांसो उत्सवा: आयोज्यन्ते, परं तत्र केवलमौपचारिकता भवति। तेषु उत्सवेषु उद्देश्यनिष्ठताया: सर्जनात्मकतायाश्च सर्वथा अभावो भवति।

विद्यालयेषु अनेकैः विद्यार्थिभिः न भागः गृह्यते प्रतिज्ञावदनेऽपि लज्जामनुभवन्ति छात्राः। साहित्यिकसृजनात्मकगायननाटकवादनप्रभृतयः उत्सवा: केवलम् आमोदप्रमोदार्थमेव, तत्र न छात्राः मूल्यं पश्यन्ति। वयं न स्वसंस्कृतौ गर्वमनुभवामः, पाश्चात्यसंस्कृतेः अन्धानुकरणं द्रव्यसेवनम्, यौनाकर्षणम् इत्यादिना छात्रेषु अनुशासनहीनता वर्द्धते।

सर्वेऽपि चिन्तनपटवा: जना: मूल्येषु जायमानं ह्रासत्वं विलोक्य सार्वजनिकजीवने मूल्यानां सङ्कटग्रस्तां स्थितिं दुःखमनुभवन्ति। विद्यालयेषु मूल्यप्रदूषणस्य व्याप्तिभावीसङ्कटस्य पूर्वसङ्केतः इति नास्ति संशयः। तस्मात् पाठ्य सहगामी क्रियाणामुद्देश्यनिष्ठत्वं तथा व्यवस्थितसंचालनं महदावश्यकं वर्तते। अतः पाठ्यसहगामिक्रियाभिः तासामायोजनेन कानि मूल्यानि विकसितानि भवन्ति इति ईषद् द्रष्टव्यम्।

1. **प्रार्थना सभा**– प्रत्येकं विद्यालये एक प्रार्थनास्थलं भवति, यत्र सर्वे शिक्षका: तथा विद्यार्थिन: एकत्रीभवन्ति। ईश्वरं प्रति निवेदयान्ति, धन्यवादं प्रकटयन्ति, सत्यतायाः मर्णोपरि चालनक्षमतां प्रार्थयन्ति। सङ्गीतोपकरणानि उपयुज्य आत्मविभोरं भूत्वा क्रियमाणा प्रार्थना अन्तरतमं मानवहृदयं श्रद्धया भक्त्या च आह्लादयन्ति। विद्यार्थिभिः प्रार्थनायां निहितार्थमणि ज्ञातव्यम्। प्रार्थनानन्तरं शिक्षकेन मूल्यसापेक्षं प्रेरकप्रसङ्गं श्रावयित्वा मूल्यशिक्षा प्रदातव्या ।
2. **उत्सवा**:–भारते विभिन्नधर्मावलम्बिन: मतावलम्बिनश्च निवसन्ति। अनेकानामुत्सवाना–मायोजनं समये–समये भवति। दीपावली–रक्षाबन्धन–होलिका–रामनवमी–दशहरा–ईदुलफितर–मुहर्रम–बारावफात–बुद्धपूर्णिमा कृष्णजन्माष्टमी–क्रिसमिस–गुडफ्राइडे–महावीरजयन्ती–गुरूनानाकजयन्ती–प्रभृतय: धार्मिकोत्सवा: जना: विश्वासेन आनन्देन च आमनन्ति। एतदरिक्तं 15 अगस्त, 26 जनवरी शिक्षकदिवस–बालदिवस–राष्ट्रियैकतादिवस–गांधीजयन्ती–शहीददिवस–सुभाष–जयन्तीविवेकानन्दजयन्तीइत्यादीनाम्आयोजनं तद्द्वद्धिवसेषु भवति। प्रेमसेवाभावा–नुशासनात्मसम्मान मैत्रीसत्यनिष्ठाभक्तिकरूपणापरोपकारत्यागधर्मनिरपेक्षता प्रभृतीनि मूल्यानि उत्सवैः विकसितानि भवन्ति।
3. **समाजोपयोगी उत्पादककार्यम्**– राष्ट्रीयशिक्षानीतौ (1986) तमे वर्षे उक्तं यत्– 'समाजोपयोगी कार्येः राष्ट्रीयैक्यं स्थातुं शक्यते यतोहि कार्यान्तर्गत आत्मानमनु– शासितङ्कृत्वा सामूहिकभावनया कार्यङ्करोति फलतश्च तस्मिन् सामूहिकभावना आगच्छति। तस्माच्च विद्यार्थिषु सहनशीलता, सहयोगस्य प्रवृत्तिः, स्वशासनस्य प्रवृत्तिः सामाजिकप्रतिबद्धता प्रभृतय: गुणा: विकसिता: भवन्ति।'
4. **वार्षिकोत्सव**: – बालचरपारितोषिकवितरणनैतिकमूल्यानां अन्येषु विशिष्ट क्षेत्रेषु उल्लेखनीयकार्य. कृतम तेभ्यः सम्मान प्रदाय, धैर्य–साहस–सहयोग सेवाभाव असाल तर यायला सौन्दर्यबोध–स्वच्छता–भ्रातृत्व–विनम्रता उत्तरदायित्वप्रभृतय: मूल्यानि विकसितुं शक्यन्ते ।

5. **सहकारिभण्डारस्य सञ्चालनम्**- विद्यालये दैनिकोपयोगीनि यथा - तूलिका, अभ्यासपुस्तिकाप्रभृतीनि वस्तूनि भवन्ति । एकस्मिन् प्रकोष्ठे, यच्च आपणस्य लघुरूपं भवति। अत्र स्वेच्छानुगुणमावश्यकतानुगुणं वा वस्तूनि स्वीकृत्य तस्य मूल्यं तत्र स्थाप्य नेतुं शक्नोति । अनेन सत्यनिष्ठा सदात्मता प्रभृतीनि मूल्यानि विकसितानि भवन्ति।
6. **अभिभावकसम्पर्कः** - वर्तमाने विद्यालयेष्वभिभावसङ्घस्य स्थापना विधीयते एतेषां सङ्घानां समये-समये उपवेशः भवति। शिक्षक अभिभावकानामेकस्मिन् मासे विद्यालयावकाशदिवसे आह्वानङ्कर्तुं शक्नोति। तथा ज्ञातुं शक्नोति यत् विद्यालये प्रदीयमानानि मूल्यानि गृहे फलितानि न वा इति।

**निष्कर्षः** - शिशूनां सर्वाङ्गीणविकासार्थं मूल्यशिक्षा महत्त्वपूर्णा भूमिका निर्वहति। पाठ्यपुस्तकमतिरिच्य प्रार्थना सभा, उत्सवाः, समाजोपयोगी उत्पादककार्यम्, वार्षिकोत्सवः, अभिभावकसम्पर्कः प्रभृतयः विविधकार्यक्रमाणामायोजनेन बालानां मूल्यशिक्षायाः अबवोधनेन सर्वाङ्गीणविकासः सम्भवति।

**सन्दर्भग्रन्थसूची**


1. भारतीय स्कूलों में मूल्य शिक्षाः अनुभव और कार्यान्वयन की रणनीतियाँ, NCERT, नई दिल्ली, 2003
2. Dolgun, Ilgaz&Dolgun, TC Omur. (2018). Values Education.
3. Patil, Yojana. (2013). Role of Value-Based Education In Society. 10.13140/RG.2.1.1847.6885.
4. Lakshmi, V.Vijaya& Paul, M. (2018). Value Education In Educational Institutions And Role Of Teachers In Promoting The Concept.